Conclusion

# ॥ उपसंहारम् ॥

विश्वस्य सकलसंस्कृतिषु भारतस्य हिन्दुसंस्कृतिः विशिष्टस्थानमावहते । मानवजीवनस्य कैवल्यप्राप्तेः मूलाधाररूपत्वाद् भारतं विश्वस्य अध्यात्मगुरुरूपेण स्थापयति । बोधयति च संसारस्य सकलमानवान् दिशानिर्देशः ।

मनुष्याणाम् आत्यन्तिकदुःखत्रयनिवृतिरुपाऽपवर्गप्राप्तये धर्माऽर्थकामाः प्रकीर्तिताः । तत्र धर्मेणैव अर्थकामौ अधिगृहीतव्यौ । धर्मेणैव मोक्षावाप्तिर्भवति । अतश्च धर्ममूलेयं संस्कृतिः भारतस्य । धर्मस्य स्वरुपावबोधाय वेदा–ऽऽरण्यक–ब्राह्मणोपनिषत्प्रभृतयः ग्रन्थाः । किन्तु विशिष्टबुद्धिरहिताः साधारणजनाः तत्तत्त्वमवगन्तुं न पारयन्तीति धिया महर्षिव्यासवाल्मीकी रामायणमहाभारतं निर्ममौ । तत्र रामायणमिदं लोकादृता प्रधानं धर्मकृतिः ।

**"प्रधानेषु कृतो यत्नः फलवान् भवति"** तथा च **"एका क्रिया द्वयर्थकरी पसिद्धा आम्राश्च सिक्ता पितरश्च तृप्ताः"** इति मनसिकृत्य **"रामायणे धर्मतत्त्वविमर्शः"** इति शोधप्रबन्धो विहितः ।

शोधकार्येण सह प्रबन्धस्यास्य विभजने षडाध्यायाः परिकीर्तिताः सन्ति । तेषु प्रथमोऽध्यायः परिचयात्मको वर्तते । तत्र संस्कृतवाङ्मये वाल्मीकिरामायणस्य महत्त्वं तथा रामायनगतविषयाणां सामान्यतया निर्देशस्तथा रामायणस्य इतिवृत्तमुद्भवस्वरुपञ्चोपनिबद्धम् । तदनु प्रसङ्गसङ्गतिमभिलक्ष्य तत्त्वविमर्शात्मको द्वितीयोऽध्यायः प्रपञ्चितः । तत्र रामायणनिष्ठकाव्यतत्त्वं–व्याकरणतत्त्वं–तथा

दार्शनिकतत्त्वस्य विमर्शणं वरीवर्तते । अनेन विवेचनेन रामायणस्य दर्शनग्रन्थपरत्वं सुतरां सिद्धयति । अध्यास्य प्रान्ते अधिरामायणं वर्णितधर्मतत्त्वस्य दिङ्निर्देशेण चर्चा परिकीर्तिता । शोधशीर्षकघटकधर्मशब्दस्य अभिप्रायः–परिभाषा–भेदपभेदानां विवेचनं तृतीयोऽध्याये विस्तृतरुपेण समपादि । चतुर्थेऽध्याये संस्कृतवाङ्मयनिष्ठधर्मतत्त्वस्य आलोडनं प्रत्यपादि । तत्र निखिलप्रमाणमूलकवेदेषु धर्मतत्त्वं, वेदोत्तरकाले धर्मस्य अवस्थितिः, धर्मस्य ह्रासविकासयोः क्रमेण चर्चोपनिबद्धा । श्रुति–स्मृतिग्रन्था अपि धर्मप्रतिपादकाः, अतः तद्गत–धर्मतत्त्वस्वरुपवर्णनञ्च प्रसङ्गसङ्गत्या विशदीकृतवान् । तत्रभवान् महर्षिव्यासविनिर्मितानि अष्टादशपुराणान्यपि धर्ममूलकान्येव । प्रसिद्धा चेयं भणितिः– **"अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**

**परोपकारः पुण्याय पापाय परपीडनम् ॥"**

अस्मिञ्जगति चेतनाऽचेतनपदार्थानां यथानियमम् उपभोगो भवेत् तथा उपजिव्योऽपजीवकयोरुभयोरपि रक्षणं परिवर्धनञ्च भवेद् इत्येव कदाचित् लौकिकं प्रात्यक्षिकञ्च कारणम् ।

कस्यापि नियमस्य ज्ञानान्तरं प्रायोगिकस्थलस्य दर्शनमावश्यकम् इति मनसिकृत्य पञ्चमेऽध्याये धर्ममीमांसा प्रतिपादिता । अत्र धर्मस्य विविधक्षेत्राणि प्रतिपादितानि । तत्र कर्मविषयको धर्मः, क्रियापरको धर्मः, सामाजिको धर्मः प्रभृतयः । अध्यास्य प्रान्ते तुलनात्मकमध्ययनमपि प्राद्राक्षित् ।

समग्रशोधप्रबन्धस्य साररुपेऽस्मिन् षष्ठेऽध्याये रामायणे धर्मतत्त्वाध्ययनमिति विशदीकृतम् । अत्र रामायणे धर्मस्वरूपमिति प्रकरणमवलम्ब्य वाल्मीकेः धर्मविषयिकी अवधारणा विलिखिता । तथा महता प्रयत्नेन रामायणगत धर्मसन्दर्भाणां सन्निवेश मयाऽकारि । प्रबन्धस्यास्य अवसाने वेद–रामायणयोः धर्मविषयिकी तुलना तथा स्मृति–रामायणयोः तुला प्रदर्शिता । प्रबन्धस्य प्रान्ते वाल्मीकेर्वचः संस्मर्य विरमामि–

**"सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः।**

**सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥[१]"**

१. वाल्मीकिरामायणम् २/१०९/१३